# श्री गणपतिस्तोत्रम्

द्विरदानन विघ्नकाननज्वलन त्वं प्रथमेशनंदन ।
मदनपतिमाखुवाहन ज्वलनाभासितपिंगलोचन ॥ १

अहिबंधन रक्तचंदन प्रियदूर्वाङ्कुरभारपूजन ।
शशिभूषण भक्तपालन ज्वलनाक्षाऽव निजान्निजावन ॥ २

विविधामरमर्त्यनायकः प्रथितस्त्वं भुवने विनायकः ।
तव कोऽपि हि नैव नायकस्तत एव त्वमजो विनायक ॥ ३

बलिनिग्रह ईश केशवस्त्रिपुराख्यासुरनिग्रहे शिवः ।
जगदुद्भवनेऽब्जसंभवः सकलान्जेतुमहो मनोभवः ॥ ४

महिषासुरनिग्रहे शिवा भवमुक्त्यै मुनयो धृताशिवाः ।
यमपूजयदिष्टसिद्धये वरदो मे भव चेष्टसिद्धये ॥ ५

गजकर्णक मूषकस्थिते वरदे त्वय्यभये हृदि स्थिते ।
जयलाभरमेष्टसंपदाः खलु सर्वत्र कुतो वदापदाः ॥ ६

संकल्पितं कार्यमविघ्नमीश द्राक्सिद्धिमायातु ममाखिलेश ।
पापत्रयं मे हर सन्मतीश तापत्रयं मे हर शांत्यधीश ॥ ७

गणाधीशो धीशो हरिहरविधीशोऽभयकरो
गुणाधीशो धीशो विजयत उमाहृत्सुखकरः ।
बुधाधीशो नीशो निजभजकविघ्नौघहरको
मुदाधीशो पीशो यशस उभयर्धेश्च शरणम् ॥ ८

॥ इति श्री. प. प. श्रीवासुदेवानंदसरस्वती विरचितं गणपतिस्तोत्रं संपूर्णम् ॥